Shri Raghunath Temple MSS. Library,
JAMMU

No. १३८२

Title भवानन्दी प्रकाशे सहचर ग्रन्थ प्रकाश:

Author महादेव पं.

Extent १२ Age x

Subject न्याय शास्त्रं

१२ पत्रे

भवानन्दीप्रकाशे संस्कारशेषप्रकाशः

१९८९

श्रीमूलकृताग्राह्यसंशयस्य तन्निश्चयाप्रतिबंधकत्वादित्यनेन ग्राह्यसंशयस्याप्रतिबंधकत्वकथ-
नेन व्यभिचारशंकायाः प्रतिबंधकत्वाभिधानमसंगतमत आह दीधितौ अत्र चेति । एतदु-
पदर्शनार्थः अनुमितौ ग्राह्यसंशयस्याप्रतिबंधकत्वादाह प्रत्यक्षे इति संशये विसंशयस्या-
प्रतिबंधकत्वाद्याचक्षे व्याख्यायां निर्णयात्मकेति । ग्राह्यसंशये स्वविशेषादर्शनादिति
भुस्य तस्य अप्रतिबंधकत्वे इति । अयमाशयः विनाविशेषदर्शनं संशयोत्तरं निर्णयवार-
णाय संशयप्रतिबंधकत्वमंगीक्रियते तस्य च संशयो मन्निश्चयेन कारणं यत्प्रत्यक्षसंश-
यसामान्यप्रतिबंधकतयैव निर्वाहः संशयद्वितीयक्षणेऽपि संशयसामग्रीसत्त्वादि-
ति तत्कारणमेतत्कं तन्न । कारणसमुदायस्तस्य नत्वेन प्रतिबंधकत्वसकलतत्का-
रणव्यक्तीनामेकदा संभवात् । नाप्यव्यवहितपूर्ववर्तित्वसंबंधेन संशयवत्त्वेनान्योन्या-
श्रयात् किंतु संशयकारणतावच्छेदकीभूततत्तद्धर्मपुरस्कारेणेत्याशयेनाह इत्थं चेति
। दीधितौ वि वेचितं च निश्चयत्वस्य कार्यतावच्छेदकत्वमंगीकृत्य निरूपितं चेदं संशयत-
त्सामग्र्योः प्रतिबंधकत्वं अधिकं निश्चयत्वस्य कार्यतानवच्छेदकत्वे संशयतत्सामग्र्यो-

रप्रतिबंधकत्वं केवलान्वयिनि तस्य साध्यके अत्र वस्तुत इत्यतः। आकूतदूषणं समाधानं च व्य
भिचारज्ञानाभावस्य सर्वत्र व्याप्तिग्रह एव हेतुत्वं मूलाभिप्रेतमित्याशयेन तस्य कुचिदे
तत्र हेतुत्वं मूलाभिप्रेतमित्याशयेन च वस्तुत इत्यादिकमिति ध्येयं। व्याख्यायां अप्रसिद्ध्येति
अस्वंउ इत्यादिः ग्रहाभावः व्यभिचारघटकपदार्थानां परस्परोपश्लेषावगाहिज्ञानाभावः
तीर्थितो मानाभावादिति तथा च यत्र तादृशभ्रमो न जातस्तत्र व्याप्तिग्रहे व्यभिचारज्ञा
नाभावस्य हेतुत्वासंभव इति भावः तत्पुरुषीयतादृशावच्छेदकत्वेति व्यभिचारग्रहाभाव
स्य व्यापकत्वांशग्रह एव हेतुतया साध्याभाववद्वृत्तित्वग्रहस्य तत्समानविषयकत्वेन
विषयतया तदभावस्य हेतुत्वासंभवेन तत्परित्यागः चैत्रस्य साध्यतावच्छेदके तादृशावच्छे
दकत्वग्रहेपि मैत्रस्य तादृशानवच्छेदकत्वग्रहात्कारणादिशिकार्यादिशिव तत्पुरुषीयत्वनि राम
वेशः तत्पुरुषीयत्वं च तत्तच्छरीरावच्छिन्नत्वं तत्तदात्मीयत्वं च तेन कायव्यूहस्थले परपुरप्र
वेशस्थले वा नानुपपत्तिः व्याख्यायां उक्ते तादृशानवच्छेदकत्वग्रहे हेतुतयोक्ते। ननु
तादृशानवच्छेदकत्वप्रकारतानिरूपितविशेष्यतासंबंधेन तत्पुरुषीयज्ञानं त्वाव

च्छिन्नं प्रति तादृशावच्छेदकत्वप्रकारत्वानिरूपितविशेष्यतासंबंधावच्छिन्नप्रतियोगिताकतत्पुरु
षीयज्ञानाभाववत्त्वेन हेतुत्वान्नोक्तदोषः न चैवं साध्यतावच्छेदकहृत्यायुक्तिरफलेति वाच्यं एता
दृशासंबंधत्वाभावेन तद्युक्तेरित्यत आह संयोगस्येति विशेषरूपेण । उक्तविशेष्यतात्वाच्छिन्ना
नेष्यत इति प्राक् निरूपित तत्त्वमेतत नवीनास्तु एतादृशावच्छेदकत्वप्रकारकत्वविशिष्टज्ञाननिष्ठ
विषयतासंबंधावच्छिन्नप्रतियोगिताकज्ञानाभाववत्त्वेन हेतुत्वं तद्धर्मप्रकारकत्वविशिष्टज्ञा
नस्य तद्धर्मप्रकारतानिरूपितविशेष्यतैव संबंध इति विशेषरूपेण संबंधत्वाविरहेपि न क्ष
तिरिति प्राहुः अपरे तु यत्र वीजे तत्कार्यत्वं तत्स्यापि विशेषरूपेण संबंधतायामेव पर्य
वसानादिति वदंति । परं तु विषयतायां वृत्तिनियामकत्वाभावप्रतियोगितावच्छेदकत्वाभा
वे तद्विषयत्वाभाव इति तत्र शास्त्रे ज्ञानमिति व्यवहारेण विषयतायां वृत्तिनियामकत्व
स्यावश्यकत्वात् वृत्त्यनियामकसंबंधस्याप्यभावप्रतियोगितावच्छेदकत्वे बाधकाभा
वाच्च । अनंतेति पुरुषभेदेनेत्यादिः ननु वस्तुत इत्यादि वक्ष्यमाणकल्पेपि विशेष्यभेदे
न कार्यकारणभावभेदात् तत्पुरुषस्यापि कुत्रचिद्विशेष्यतया पुरुषभेदेनानंतको

भवानं.टी.

र्थकारणाभावप्रसंगो दुर्वार एव न तत्स्वरूपातिरिक्तविशेष्यभेदेनानंतकार्यकारणभावकल्पना
२ गौरवं कार्यतावच्छेदककारणतावच्छेदकधर्मगौरवं चपुनरधिकमित्यत आह वह्न्यभावासि
तिप्रसिद्धाया इत्यादिना वह्न्यभावास्येत्यर्थः । यत्तु नन्वेवमपि येन पुंसा यादृशसाधनवन्निष्ठा
भावप्रतियोगितावच्छेदकत्वं तच्च विशिष्य न गृहीतं तस्य तादृशावच्छेदकत्वग्रहाप्रसिद्ध्या तन्नि
यततादृशानवच्छेदकत्वग्रहे तादृशावच्छेदकत्वग्रहाभावस्य तद्विषयत्वाभावस्य च हेतुत्वासं
भवइत्यत आह ~~प्रसिद्धाया इत्यादिना वह्न्यभावास्येत्यर्थः~~ वस्तुतस्तु स्वतन्त्रास्यं
तत्र सम्यक् । अभावज्ञाने प्रतियोगिज्ञानस्य हेतुतया तादृशावच्छेदकत्वग्रहं विना तादृशा
नवच्छेदकत्वग्रहासंभवेन तादृशानवच्छेदकत्वग्रहजनकीभूतप्रतियोगिज्ञानस्यैव तादृशाव
च्छेदकत्वग्रहरूपतया सर्वत्रैव तस्य प्रसिद्धत्वात् । अत एव दीधितौ प्रसिद्धाया इति व्याख्यातं राम
च तादृशानवच्छेदकत्वग्रहे जननीये प्रतियोगिज्ञानमुख्यावश्यं प्रसिद्धाया इति तदर्थं वव
क्ष्यति । यदपि नन्वेवं महाशरीरनाशोत्पन्नस्वरूपेनन्तादृशावच्छेदकत्वग्रहस्य तद्विषय
कालेऽतद्व्ययवावच्छेदेनोत्पन्नतादृशावच्छेदकत्वग्रहद्वितीयक्षणेत्पन्नखंडशरीरावच्छेदे

न तादृशावच्छेदकत्वग्रहापत्तिस्तत्तदवच्छेदेन तादृशावच्छेदकत्वग्रहस्य तद्विषयत्वस्य चाभावा
त्। न च ज्ञानमात्रे शरीरस्य कार्यसहभावेन हेतुतया कथं तन्नाशकाले तादृशावच्छेदक
त्वग्रहोत्पत्तिरिति वाच्यं। तस्य पूर्ववर्त्तित्वेनैव हेतुत्वात् अवयवावयविसाधारण्येन व्या
वत्वस्यैव जनकतावच्छेदकतया कार्यसहभावेन हेतुत्वेपि क्षत्यभावाच्च। स्वरसत आह वस्तु
त इतीति न इत्यन्त तत्पूर्वं स्वं शरीरविरहेण तत्रावच्छेदकतया ज्ञानोत्पत्त्यसंभवेन तद्
तदवयवावच्छेदेनैव वस्तुतस्तत्तदवच्छेदेन च तादृशावच्छेदकत्वग्रहस्यैव सत्त्वेन ता
दृशावच्छेदकत्वग्रहापत्त्यभावात्। एतेन न वर्त्तीनागतसाध्यतावच्छेदके तादृशाव
च्छेदकत्वग्रहो न स्यात् तत्र तदवयवविहितपूर्वक्षणे तदवच्छेदेन तादृशावच्छेदकत्वग्रहाभा
वस्य तद्विषयत्वाभावस्य वा सत्त्वात्। तदधिकरणकालस्यैव तत्त्रिष्ठधर्मावच्छेदकत्वा
दित्यत आह वस्तुत इतीत्यपि परास्तं। यत्र विद्यमाने ऽधिकरणे संबद्धम् अवच्छेदकं
तत्रैवाधिकरणकालयोः संबंधो ऽवच्छेदकत्वे तंत्रं न तु यत्राविद्यमाने प्यधिकरणे संबद्धं
तत्रापीत्यंगीकारेणोक्तदोषाभावात् अत एव विधिवाक्ये यत्रावच्छेद्यं धर्मिणि सत्त्वे

भवानं.दी.

वृत्तत्वावच्छेदकमपि तथा यत्रत्वावच्छेदमसम्यपि धर्मिणि तत्संबद्धं ज्ञानादि वृत्तत्वावच्छेदकम
२ पि तद्धर्मेवेतित्तदसंबद्धज्ञस्यापि कालस्यावच्छेदकत्वमित्युक्तं पक्षधर्मिधौ रित्यलं पर[illegible]
3 गवेषणेन। दीधिते तो साध्यसाधनेति साध्यतावच्छेदकसाधनतावच्छेदकेत्यर्थः। विशेषे
वप्याप्यविशेषं व्यभिचारविशेषं प्रकारविशेषं धर्मितावच्छेदकाविशेषं च निवेश्येव। का
र्यकारणभावः विभिन्नकार्यकारणभावः सामानाधिकरण्यप्रत्यासत्त्या वाच्य इति शेषः
। इत्यादिकमिति आदिना स्वाभावघटितव्यभिचारज्ञानपरिग्रहः तावदभावएव
समवायसंबंधावच्छिन्नप्रतियोगिताकतदभावएव व्याख्यायां सामानाधिकरण्येति
तथा च विशेषणतासमवायघटितसामानाधिकरण्यप्रत्यासत्त्या हेतुतात्त्वाभावप्र
त्यक्षनिष्ठ इत्युक्तमिति भावः नानाविधेति प्रसिद्ध्यादिः अत्र समानप्रकारकव्यभिचा राम
रज्ञानस्येव प्रतिबंधकत्वे पूर्वकल्पेनापंदोषइति ध्येयं। दीधितेो न वारयाम इति। किंतु
भिन्नविषयकताहशावच्छेदकत्व संज्ञानाभावस्येव सर्वत्र हेतुत्वं वारयाम इति शेषः तथा च
प्रत्यक्षाणामपि क्वचित्स्वविषयतया आत्मनिष्ठप्रत्यासत्त्या हेतुत्वे कारणतावाहुल्यस्या

वच्छेदकभेदयोरेवस्य च प्रसंगेन विषयनिष्ठप्रत्यासत्त्या तथाकल्पनस्यैव सम्यक्त्वादिति भावः
व्यारव्यायां अवच्छेदकत्वतु बुद्धीति इत्यनुपलभ्यमानं तदभाववद्बुद्धीत्यपि इत्थं तत्र तत्प्रकारीर
विशेष्यनिवेशफलं दर्शयन्नेव विशेषपर्यवसानेपि तथाकल्पने को दोष इतिशंकानिरा
सायभावं आह धूमजनकेति नसार्वत्रिकत्वमिति तथा च सर्वत्र तादृशानवच्छेदकत्वप्र
हे तादृशावच्छेदकत्वग्रहविषयत्वाभावस्य हेतुत्वासंभवेनाप्रसिद्धस्थले तथा। हेतुत्वमे
वनेति फलितं एवं च मतद्वयेपि विषयभेदेन कारणताभेदस्यावश्यकत्वे तुल्ये विषय
निष्ठप्रत्यासत्त्या तथाकल्पने गुरुतरभेदेन तावत्कारणताभेदेऽतीवगौरवमित्यात्मनि
ष्ठप्रत्यासत्त्यैव व्यभिचारज्ञानाभावस्य हेतुत्वं लाघवादुचितमिति तथाकल्पनस्या
नौचित्ये तात्पर्यात्तद्वारणमित्याशयेनेत्यर्थः। ननु धर्मितावच्छेदकनिष्ठप्रत्यासत्त्या तथा
कल्पने धूमजनकत्वेनाग्रहेऽभावेन तस्य विशेषविश्रान्त्यभावेन नोक्तरीत्या तद्वारणं
संभवतीत्यत आह दीधितौ दिगिति दिगर्थस्तु जनकतावच्छेदककोटिनिविष्टनिष्ठ
यत्वनिर्वचनानुरोधेन धर्मितावच्छेदकनिवेशस्यावश्यकतया न तथाकल्पने विशेष

भ.वा.नं.दी.

विशिष्टेति रावणपक्षीय न च तदभावाप्रकारकत्वे सति तत्प्रकारकत्वं धर्मितावच्छेदकाभिमतं नि
श्चयत्वं निर्वक्तव्यमिति वाच्यं तथा सति समुच्चयासंग्रहापत्तेः। न च संशये उभयप्रकारता
निरूपितैका विशेष्यता न तु समुच्चये इति तदभावप्रकारता निरूपिततत्प्रकारतानिरूपि
तविशेष्यताकत्वमेव सामान्यतो निश्चयत्वमिति वाच्यं। संशयसमुच्चययोर्विशेष्यताभेदा
भेदयोर्नियामकाभावेन तथा वक्तुमशक्यत्वात् न च स्वावच्छिन्नविशेष्यतानिरूपितविरोधसं
बंधावच्छिन्नतदभावप्रकारताकत्वविशिष्टतत्प्रकारताकत्वसंबंधेन किंचिद्धर्मविशिष्टा
न्यत्वमेव निश्चयत्वमिति वाच्यं वह्नित्वं तादृशावच्छेदकं घटत्वं तादृशावच्छेदकं न वेति निश्च
यासंग्रहात् स्वावच्छिन्नेत्यादिसंबंधत्वे मानाभावाच्चेत्यधिकमस्मत्कृतेऽनुमितिपरामर्श
योः कार्यकारणभावघटकसंबंधविचारेऽनुसंधेयमिति संक्षेपः। आरम्भायां समानाधिक राम
रण्यांश इति सामानाधिकरण्यविशेषणकसामानाधिकरण्यांशे इत्यर्थः समानाधिकरण्य
~~व्याप्तिस्वरूपे हि सहचारस्य विशेष्य~~णं वृत्तित्वांश इति यावत् तत्रैव विवक्षितसहचारस्य
विशेषणत्वात्। अत एव दीधितौ वक्ष्यति समानाधिकरण्यवृत्तित्वांश इति व्याप्तिस्वरूपमिति

याद्दशव्याप्तिस्वरूपे सहचारस्य विशेषणतया घटकत्वं तादृशव्याप्तिस्वरूपमित्यर्थः व्यापकसा
मानाधिकरण्य। रूपव्याप्तिस्वरूपे हि सहचारस्य विशेष्यतया तद्व्याप्तिप्रकारकज्ञाने सहचारज्ञा
नस्य विशेषणज्ञानविधया हेतुतानिर्वाहेपि तद्विशेष्यकज्ञाने तद्धेतुताया अनिर्वाहादिति भा
वः दीधितौ रासभादितिनिरूपितत्वमेतत्र। समानाधिकरण्यवृत्तित्वांशे तेन च समानाधिकर
णांशे व्यापकत्वसहचारज्ञानस्य विशेषणज्ञानविधया हेतुत्वं संभवतीति वाच्यं। अन्वयव्य
तिरेकाभ्यां हेतुविशेष्यकसाध्यसहचारप्रकारकज्ञानहेतुताया एव सर्वसिद्धायामुक्ते ऽकृते
न तस्याः समानाधिकरण्यांशमात्रग्रहे ऽसंभवात्। केचित्तु मूले सहचारपदं हेतुभावयोः सहचा
रपरमित्याहुः। अपरे तु मूले सहचारपदं व्याप्तिघटकीभूतसकलपदार्थपरमेव तावत्पदा
र्थोपनयं विना संनिकर्षाभावेन व्याप्त्युपनीतभानासंभवात् अन्यथा मूले न्यूनतापत्तेः साध्यादिवि
शेषणमात्रकथनपरत्वे तु वृत्तित्वमात्रस्यैव वक्तव्यतापत्तेरित्याहुः। व्याप्तिघटकीभूतायां वि
शेषणकथनेन न्यूनतापरिहाराय यस्यां व्याप्तौ सामानाधिकरण्यमेव विशेषणं तद्व्याप्तिपर
तयैतत्र ग्रंथव्याख्यानेपि कुर्वं तितन्मतमाह साध्यसंबंधिनेति व्याख्यायां विरोध इति पद्य

भवानं.टी

5

तन्मते हेतुतावच्छेदकेसाध्यसामानाधिकरण्यावच्छेदकत्वाभावएवव्यभिचार इति नोक्तविरोधो
स्वरसः संभवति तथापि अवच्छेदकत्वस्वरूपविशेषणेन वृत्तिमत्वसाध्यसमानाधिकरणक
त्वरूपपारिभाषिकावच्छेदकत्वस्यैव लघुत्वे कतायाः पूर्वमुक्तत्वेन तस्याः गुरुशरीरायाअनुमि
त्यनुपयोगित्वं तत्र हेतुनिष्ठसाध्यसहचारस्याघटकतया तज्ज्ञान [illegible]स्य विशेषणज्ञान
मुद्रया हेतुत्वासंभवश्चास्वरसो बोध्यः व्याप्तिज्ञाने सहचारस्यैवाविशेषणतां ज्ञानस्य हेतुत्वा
कल्पनेन मूलस्यप्रकृतलेखस्यानंगत्वे एवसहचारज्ञानस्य व्यापकताग्रहहेतुत्वमिति मिश्रमत
माह दूषितो घिते यतितिति । तथाकल्पनं । वह्निधूमयोः सहचारज्ञानस्य हेतुताकल्पनेन व्या
ख्यापकभावादिति । वह्निव्याप्यत्वभ्रमे वह्निसहचारभ्रमस्य धूमव्यापकत्वभ्रमे धूमसहचा
रभ्रमस्य हेतुत्वेसिद्धे उपद्विशेषयोरिति न्यायेन वह्निव्याप्यत्वज्ञानमात्रे वह्निसहचारज्ञानस्य राम
धूमव्यापकताज्ञाने धूमसहचारज्ञानस्य हेतुत्वे सिद्धे यत्सामान्ये यत्सामान्यं प्रयोजकं
तद्विशेषे तद्विशेषस्य प्रयोजकत्वमिति न्यायेन वह्निव्याप्यत्वज्ञानविशेषधूमव्यापकत्व
ज्ञानविशेषे वह्निधूमयोर्व्याप्यव्यापकभावज्ञाने वह्निसहचारज्ञानधूमसहचार

ज्ञानविशेषस्य वह्निधूमयोस्सहचारज्ञानस्य हेतुत्वकल्पनस्यावश्यकत्वमित्याशयः यत्तु वह्नि
धूमयोर्व्याप्यव्यापकभावज्ञानस्य वह्निसहचारज्ञानधूमसहचारज्ञानोभयजन्यतावच्छेद
काक्रान्ततया तदुभयहेतुत्वसिद्धाविष्टसिद्धिरिति तत्र तावता वह्निसहचारज्ञानधूमसहचा
रज्ञानयोस्तत्र हेतुत्वसिद्धावपि धूमविशेष्यकवह्निसहचारप्रकारकज्ञानात्मकस्य वह्नि
धूमयोस्सहचारज्ञानस्य हेतुत्वासिद्धेरिष्टसिद्धेरभावात्। यद्यपि निरूढाद्विसाधारणस्य
सहचारज्ञानत्वस्यैकस्याभावेपि तत्र साध्यसहचारज्ञानस्य हेतुत्वे कल्पनीये धर्मिता
वच्छेदकनिष्ठप्रत्यासत्त्यैव तत्कल्पनादिष्टसिद्धिरिति नवीनैरुक्तं तदपि दिगर्थोपदर्शितरी
त्या तथा हेतुत्वासंभवेन चिंत्यमेव। ननु मिथ्य इतीति तथा च तयोर्योगायद्योस्तथा नियतान्व
यव्यतिरेकाभावात्तत्र सहचारज्ञानस्य व्यापकताज्ञानहेतुत्वमिति भावः। ननु कृतचित्का
न्वयव्यतिरेकाभ्यामेव तद्धेतुत्वं स्यात् तत्राह। अन्यथेति इति किं न स्यादिति वैपरीत्य
मेव किं न स्यात् तथा चान्योन्याश्रय इति भावः। यत्तु अनुपत्र चाकचिक्यज्ञानरूपदोषात्प्रज्ञा

भवानं·टी·

6

तत्वभ्रमस्तत्र रजतत्वभ्रमे चाकचिक्यज्ञानस्य यथा हेतुत्वं तथा यत्र सहचारभ्रमरूपदोषा
व्यापकत्वभ्रमस्तत्र विशेषतो हेतुत्वे सिद्धे उक्तरीत्या व्यापकत्वाज्ञाने सहचारज्ञानहेतुता
सिद्धिर्दुर्वारेत्यत आह अन्यथेति तथा च यत्र व्यापकत्वभ्रमरूपदोषात्सहचारभ्रमस्तत्र
सामान्यतः सहचारज्ञानेपि व्यापकत्वज्ञानस्य हेतुतापत्त्याऽन्योन्याश्रय इति भावः । दीधितौ
विद्यमानमिति प्रतियोगितावच्छेदकत्वमित्यर्थः तेनान्वयः वह्नित्वे संनिकृष्टवह्नित्वेऽव्यव
हितत्वेत्यादिना प्रत्यक्षसामग्र्यभाव उक्तः । ननु व्यवधानविप्रकर्षयोरभेदः उभयत्रापी
न्द्रियसंनिकर्षाभावस्याविशेषादत आह व्याख्यायां तत्रेति विप्रकर्षे इत्यर्थः । इंद्रियसं
निकर्षेपीति तथा च व्यवहितत्वं मध्यवर्तिभित्त्यादिप्रयुक्तसंनिकर्षाभावत्वं विप्रकृष्टत्वं राम
च संनिकृष्टत्वे सति । दृढतरवर्त्तित्वादिरूपदोषविशिष्टत्वमित्यत्र तात्पर्यात्रोक्तदोषवइति
भाव ८ दीधितौ । न गृह्यते न लौकिकप्रत्यक्षविषयो भवति अभावदेशेति । अभावाधि
करणगासभादिदेशेत्यर्थः । विप्रकर्षादिनेति । आदिना व्यवधानपरिग्रहः । ग्राहकाभा

त्वप्रत्यक्षकारणीभूतविशेषणतासंनिकर्षाभावेनसर्वांशेलौकिकप्रत्यक्षासामग्र्यभा
वात् तादृशावच्छेदकत्वग्राहकसामग्र्याअभावदेशग्राहकसामग्रीघटित्वादिति
भावः तथा अभावदेशाविप्रकर्षादिनाग्राहकाभावात् सत्त्वेपि वह्नित्वे इत्यनुष
ज्यते। अग्रहेति लौकिकप्रत्यक्षाभावेत्यर्थः अनुपलब्धेः तादृशप्रतियोगितावृ
च्छेदकत्वरूपप्रतियोग्युपलम्भस्याभावस्य। आख्यायांप्रतियोगीतिअभावप्रतियो
गिसत्त्वापादनायादि तत्स्वप्रतियोगिकत्वमित्यर्थः प्रतियोगीति अभावप्रतियोगी
त्यर्थः योग्यतेतियोग्यतांतरेत्यर्थः तथा च पक्षवृत्तितिविशेषणविशेषितंतादृशाव
च्छेदकत्वसत्त्वंभोपलम्भाभावादेकव्यभिचारित्वादितिभावः दीधितौतत्सामान्याभावः
धूमवह्निष्ठाभावप्रतियोगितावच्छेदकत्वसामान्याभावः संनिकृष्टधूमाधिकर
णदेशनिष्ठाभावप्रतियोगितावच्छेदकत्वाभावग्राहकयोग्यानुपलब्धेः संभवा
त्सामान्यपदं लौकिकप्रत्यक्षयोगम्य इति उपनीतभाने योग्यानुपलब्धेरपेक्षणात्

भवा॰ टी॰

७

त्र लौकिकेत्युक्तं । अत्र तार्किकचक्रवर्तिनो नव्याः धूमाधिकरणवृत्त्यभावप्रतियोगितावच्
छेदकत्वं यत्र तत्संनिकृष्टे घटत्वादौ साक्षात्क्रियते तद्धासंनिकृष्टेवह्नित्वे साक्षात्क्रिय
माणेपि तत्त्वेन तद्रूपवत्त्वं साक्षात्क्रियते तत्तद्ग्राहकसर्वकारणसत्त्वादिति प्रतियो
गिसत्त्वेनापादितेन प्रतियोग्युपलंभापादनं संभवत्येव धूमाधिकरणादिभिः स
र्वैः समं संनिकर्षादिसत्त्वात्तद्दृष्टान्ते तु रासभाधिकरणादिसंनिकर्षाभावादत्रा
ण । एवं प्रतियोगितावच्छेदकप्रतियोग्युपलंभकसर्वकारणसमवधानमप्यस्ति
धूमाधिकरणादिभिस्सर्वैः समं संनिकर्षादिसत्त्वात् यत्तु वह्नित्वावच्छिन्नाभावेन सम
मसंनिकर्षात्प्रतियोगिग्राहकसर्वकारणसमवधानं । न च प्रतियोगितावच्छेदकव्याप्ति
रिक्तानामेव तत्कारणानामपेक्षणात् असंनिपेक्षणात् असंनिकर्षो नापेक्षणीय इ राम
ति वाच्यं । तथा सति धूमाधिकरणसंनिकर्षेपि तत्प्रत्यक्षप्रसंगेन व्याप्यमध्ये
तस्याप्रवेशादिति तत्र धूमवद्वृत्त्यभावसंनिकर्षस्यैव तत्रापेक्षणेन तस्य सत्त्वात् वह्न्य

भावेनापि समं धूमादौ संनिकर्षस्य त्वाद्यु धूमाधिकरणीयतत्संनिकर्षस्याप्रयोजकत्वा
त् पर्वतानुवह्निधूमयधूमाधिकरणांतरसंभावनातदृशासंशयसामग्र्याश्च बलवत्वा
त्तादृशावच्छेदकत्वसंशयोत्तरनिश्चयइष्यतस्तत्संभावनाकालेन तल्लौकिकप्रत्यक्षं न वै
वम्यानुमानिकादिप्रतियोगितावच्छेदकत्वादिग्रहेण प्रतिबंधो नस्यादिति वाच्यं। इष्टा
पत्तेः लौकिकप्रत्यक्षसामग्री विघटनस्य कर्तुमशक्यत्वात् किंच यत्र प्रत्यक्षे ग
हीतप्रामाण्येन तेनाप्रामाण्यशंकाध्यानेदोषविशेषजन्येपीतशंखवादिप्रत्यक्षेपी
तत्वाभावानुमानेन च इति तस्माद्वह्निधूमयधूमाधिकरणांतरसंभावनाविरहद
शायां संशयसामग्र्यभावान्मूलकारादिसंमतं ध्यानेलौकिकप्रत्यक्षत्वं साध्यो
पदृत्ति वदंति। नन्वेतस्यां व्याप्तेरुक्तरीत्या लौकिकप्रत्यक्षाभावेऽपनीतभानानुमि
त्यादेर्दुर्निवारत्वसापेक्षत्वया संभवेन लौकिकसंनिकर्षजन्यतादृशावच्छेदकत्वस्याभावत्वा
दिसाम्यत्वलक्षणस्यायाभावस्य च ज्ञानानां तादृशावच्छेदकत्वाभावोपनीतभानस्य च स्व

पंसामान्यलक्षणायाअनंगीकारादसंभवेनचदुर्ज्ञेयत्वमेवस्यादत आह परन्त्विति। वि
रोधस्फुरणवशादित्तिपाठः विरोधादिस्फुरणवशादिति पाठे आदिनाभवाक्यपरि
ग्रहः। तादृशावच्छेदकत्वाभावग्रहो यथा दकतयोक्तं वशादित्यंतं व्याचष्टे व्याख्यायां धू
मवतीत्यादिना। धूमत्वे धूमवत्वविशिष्टे प्रतियोगितावच्छेदकत्वस्यापि एतस्य विरो
धे शंकायां चान्वयः। विरोधे न धूमवत्त्वे तादृशावच्छेदकत्वाभावव्याप्यत्वरूपविरो
धस्फुरणेन। ननु तादृशावच्छेदकत्वाभावस्यानुपस्थितौ धूमवत्वादावपि कथं तद्ग्रहः
न च तादृशावच्छेदकत्वस्याभावस्य चोपस्थितौ मनस्यात तद्ग्रहसंभव इति वाच्यं। तथा राम
सति धूमवत्वादौ तद्ग्रहं विनापि तदुपस्थितौ वह्नित्वादावपि वह्न्यभावाग्रहतर्केण व्यभिचा
रशंकानास्कंदस्मरणतयात तद्ग्रहसंभवेन वह्नित्वादौ तद्ग्रहसंपादकतया धूमवत्वादौ तद्ग्र
प्रदर्शनवैयर्थ्यादित्याशंकानिरासाय दीधितौ कथंचिदित्युक्तमित्याशयेनाह वस्तु
गत्येति विरोधे ति निरुक्तविरोधे त्वर्थः व्यभिचारे निधूमत्वादौ धूमसमानाधिकरणा

भावप्रतियोगितावच्छेदकत्वशंकेत्यर्थः प्रतिबंधकत्वं प्रतिबंधकत्वानुरोधेनावश्यकत्वे
तत्रापि वन्हित्वादावपि आदिना धूमत्वादिपरिग्रहः उपनयवशादेव निरुक्तविरो
धस्फुरणस्य कोपनयवशादेव तद्भावः तादृशावच्छेदकत्वाभावः भासत इति तथा
च निरुक्तविरोधस्फुरणस्य धूमत्वादौ व्यभिचारशंकाप्रतिबंधकत्वं तादृशावच्छेदक
त्वाभावोपनायकत्वं चेति भावः। न च निरुक्तविरोधस्फुरणमप्युपनीतभानमेवेति त
त्राप्युपनयांतरस्यावश्यकत्वं तदितिवाच्यं। आप्तवाक्यादिनासंसर्गविधयावाक
र्थं चिन्नत्संभवात् इति भवतां लोकशंकानिरासस्यैव तादृशार्थस्य सूचनाय। उक्त
मिति तथा च पीधिनो कथं चिदित्यस्य विरोधस्फुरणे गृह्यते इत्यत्र वान्वयः विरो
धस्फुरणवशादिमस्याभिगृहीत इत्यत्र गृह्यत इत्यत्र वान्वयः गृहीत इत्यस्य च क्र
मस्य पार्थ्यातीतत्वाविवक्षणस्ये नग्रहणविषय इत्यर्थः एवं चैकुंपैव सामग्यारक्रे
व धूमत्वादौ वन्हित्वादौ च तादृशावच्छेदकत्वाभावग्रहोत्पत्तौ गृह्यत इत्यंतग्रंथ

तात्पर्यान्नोपदर्शितप्रकारान्तरमित्याशयः। ननु निरुक्तविरोधस्फुरणकालेपि धूमत्वा-
द्येधूमाद्यधिकरणवृत्तित्व घटाद्यभावप्रतियोगितावच्छेदकत्वग्रहे बाधकाभावेन त-
द्वाधूमत्वादौ कथं तादृशावच्छेदकत्वाभावग्रहो भविष्यतीति चेन्मैवं। धूमत्वादौ ता-
दृशाभावप्रतियोगितावच्छेदकत्वग्रहे तादृशाभावेपि तुल्यवित्तिवेद्यतया धूमत्वाद्य-
वच्छिन्नप्रतियोगिताकत्वग्रहे निरुक्तविरोधस्फुरणदशायां च धूमत्वाद्यवच्छिन्नप्र-
तियोगितावच्छेदकीभूतस्य धूमाद्यधिकरणवृत्तित्वं न भासितुमर्हतीति तद्धर्मावच्छिन्नवि-
शेष्यकतत्प्रकारकबोधे तद्धर्मावच्छिन्नविशेष्यकतदभावप्रकारकबोधस्य प्रति राम
बंधकत्वात् तद्धूमवति धूमाभावस्यैवेति ग्रंथपर्यालोचनया सामग्रीसत्वेन धू-
मादौ धूमाद्यभावविरोधस्फुरणस्य तुल्यवित्तिवेद्यतया धूमाद्यभावे धूमाद्य-
धिकरणवृत्तित्वात्मकधूमाद्यभावव्याप्यत्वात्मकधूमादिविरोधावगाहिन आ-
वश्यकतया प्रतिबंधकत्वात्। तथा च धूमत्वादौ तादृशावच्छेदकत्वग्रहे धूमत्वा-

घावच्छिन्नप्रतियोगिताकत्वावच्छिन्नविशेष्यकधूमाद्यधिकरणवृत्तित्वग्रहोत्पादक
सामग्र्याबाधाभावघटिताया व्यापकसामग्रीविधया सहकारित्वात्तदानीं च तादृ
शविरोधस्फुरणस्यैव बाधरूपस्य सत्त्वेन तदभावघटितसामग्र्यभावेन धूमत्वा
दौ तादृशावच्छेदकत्वग्रहासंभवेनोक्तदोषाभावात्। तार्किकचक्रवर्तिनस्तु तादृशा
वच्छेदकत्वस्य विशिष्टवैशिष्ट्यबोधमभिप्रेत्याहुः परं त्वित्यादि। अन्यथा एवं उशाउप
स्थित्यापि तादृशबोधसंभवात्। प्राक् धूमत्वादौ तद्ग्रहणस्यानुपयोगित्वापत्तेः।
अन्यथा तत्रापि तद्ग्रहे अन्यत्रापि तद्ग्रहणस्यापेक्षितया मतेऽनवस्थाप्रसंगात् वि
शेषणतावच्छेदकप्रकारकनिश्चयमात्रं संशयसामग्रीविघटकमाह। कथं चिदि
रोधादौ त्विति। धूमत्वादौ धूमादिव्याप्तिप्रतियोगिताभावप्रतियोगितावच्छेदकत्वबुद्ध्यादिरू
पादिरूपधर्मग्रहदशायामित्यर्थः। आदिना तदभावावच्छेदकपरिग्रहः। नन्वत्राग्र
हणे धूमत्वादावपि कथं तद्ग्रहणमित्यत आह कथं चिदिति एवं उशाउपास्थिते

भवा.टी स्यर्थः। एवं च गृहीत इत्यनेनान्वितमिदमितिसीत्यापरं त्वित्यादिदीधितिग्रंथं व्याचष्टुरिति दि
१० क्। दीधितौ न व्याप्तिधीः व्याप्तिनिश्चयसामान्याभावः अन्यथानुमानादिना व्यभिचा
रग्रहे पि व्याप्तिलौकिकप्रत्यक्षापत्तेरिति भावः विपरीतज्ञानरूपप्रतिबंधकसत्वा
न्न तथापत्तिरत आह निर्णयेत्यादि। भा व्रस्येति विरोधित्वादित्यनेनान्वयः व्यारव्या
यां इत्यन्वय इति तथा च तादृशज्ञानत्वेन तादृशनिश्चयत्वेन च प्रतिबंधकत्वं लब्धमि
ति भावः निर्णयात्मकेति। तीति। इदमुपलक्षणं निश्चयात्मक इतीत्यपि द्रष्टव्यं तथा
बाधे निश्चयत्वं प्रतिबध्यतावच्छेदकं द्वितीये तु प्रतिबंधकतावच्छेदकमिति भावः दो
षविशेषेणेति पुरुषरजतादिभ्रमस्यानुमानिकतदभावनिर्णयप्रतिबध्यत्वादि राम
शेषपदं। पित्ताद्विनेति। आदिना तमसि नीलत्वावभ्रमजनकदोषपरिग्रहः। उप
नीतभानत्वस्य व्यावृत्तिमाह लौकिकसंनिकर्षेणेति अनुमित्यादेः संग्रहा
ह उपनीतभानत्वेनेति सामान्यलक्षणेति आदिना परामर्शादिपरिग्रहः। आ

घे आद्यप्रतिबंधकतायां ऽक्रमि तितथा चाद्वितीयकल्पानुसरणमपि तद्धर्ममेवेति भा
वः। अधिकं चेति अयमाशयः बाधनिश्चयत्वेन पृथक् प्रतिबंधकतायांमानाभावः
तत्कालीन संशयजनककोट्युपस्थितिः। प्रकृतीनामुत्तेजकत्वेन निर्णयत्वमनिवे
श्य संशयसाधारण्येन प्रतिबध्यतावच्छेदकतया संशयोत्तर संशये व्यभिचा
राभावात् बाधनिश्चये संशयानुत्पत्तिसंभवात् तत्कालीन विशेषदर्शनाभा
वोत्तेजकतयावनचैवमित्यादिनाशंकितदोषानवकाशः एवं योग्यतासंशय
कालीन शाब्दबोधजनकतत्त्वस्याप्युपस्थितेरप्युत्तेजकतयावत्ताद्दशज्ञानाद्बो
धेपि व्यभिचारः। नचैवमपि बाधनिश्चयकाले लौकिकसंशयापत्तिस्तस्य लौ
किकसंनिकर्षजन्यत्वघटितप्रतिबध्यतावच्छेदकानाक्रांतत्वादिति वाच्यं। सं
शयानंतरं सादृश्याकरोमीत्यनुव्यवसायाभावेन संशये लौकिकविषयता
या अभावेन लौकिकसंशयस्यैवाभावात्। एवं च निश्चयत्वं प्रतिबध्यतायां

प्रतिबंधकतायां चानिश्चयसंशयसाधारण्यं तज्ज्ञाने संशयसाधारण्यं तद्विपरीतज्ञा
नमात्रं प्रतिबंधकमिति कल्पितमिति। वन्ह्यभाववदवृत्तित्वसत्त्वेपीति पाठः तत्र धूम
त्वावच्छिन्ने तदभावेतिसत्त्वाभावभावनेति विग्रहे एवं वन्ह्यभाववदवृत्तित्वात्मका
भावे स्वार्थः एवमग्रेपि न गृह्यतइति योग्यानुपलंभविरहादिति भावः तद्धूमेपीति
तदभावो न गृह्यतेति विभक्तिविपरिणामेनानुषंगः देशांतरवृत्तित्वसंभावनाया:
शंकापिशाचीत्वेन दुर्वारत्वात् देशांतरवृत्तित्वविरहस्येव योग्यानुपलब्धिसंपा
दकत्वया प्रकृते पशुकत्वेन संभावनापर्यंतस्य प्रकृतानुपयोगात् बुद्धिधिनोसंभाव
नाविरहादित्युक्तं तत्राह इना देशांतरवृत्तित्वविरहोग्राह्य इत्याशयेनाह। वस्तुत
स्त्विति। ननु धूमांतरे वन्ह्यभाववदवृत्तित्वरूपव्यभिचारसंशयेन कथं धूमत्वावच्छे
देन वन्ह्यभाववदवृत्तित्वग्रह इत्यत आह सीधितौ लाघवादिति व्याख्यायां तद्विद
लेति प्रसिद्धधूमइत्यादिना। तथा च व्यभिचारज्ञानप्रतिबंधकतायां लाघवसा

नस्योक्तेः जकृतव्यत्लाघवज्ञानविरहविशिष्टव्यभिचारज्ञानाभावेन धूमांतरे व्यभिचा
रसंशयेपि धूमत्वावछेदेन वन्ह्यभाववद्वृत्तित्वग्रहे बाधकाभावइति भावः अत्रा
नुपारीत्याधूमाधिकरण वृत्यभावप्रतियोगितानवछेदकत्वमपि वन्हित्व
तां हावछेदेनसाध्यतावछेदकत्वशक्यतएवतुल्यन्यायादित्यपि केचित्। रूपाभावइति
इदं च प्रतियोगितावछेदकयोग्यत्वे च संसर्गाभावप्रत्यक्षे तंत्रमिति प्राचीनम
तेमहावायोरूपसामान्याभावोपिलौकिकप्रत्यक्षइत्याशयेनोक्तं तदनभ्युपगं
तृसांप्रदायिकमतेरूपपदस्योद्भूतरूपपरतयारूपाभावपदमुद्भूतरूपाभा
वपरतया व्याख्येयं। उद्भूतरूपस्यापि लाघवरूपपदस्यापि धूमत्वावछेदेनेतितदव
छिन्नलिंगकानुमितिमुपयोगितद्वच्छिन्नव्याप्तिज्ञानस्यैव प्रकृतोपयोगित्वमि
त्याशयः। न संभवतीति धूमत्वावछिन्न इत्यादिः प्रागुपदर्शितरीत्या योग्यानुपलं

भवानं.सी.

12

भविरहादितिभावः॥ सहचारेति हृद्बोधिया व्याख्यायत्नतः कृता। तया तुष्यंतु नितरां मात्सर्यर
हिता बुधाः॥ ॥ॐ॥ ॥ इति श्रीमन्महादेवविरचिते भवानीसप्रकाशे सहचारग्रंथ
प्रकाशस्समाप्तः॥ ॥ श्रीरस्तु॥ ऐश्वर्यमस्तु॥ रिपुक्षयोस्तु। कुशलमस्तु॥ चिरायुरस्तु॥
इदं पुस्तकं बालमुकुन्द भट्टस्यास्ये इदम्॥ ॥ लिखितं ब्राह्मणेन॥ ॥ शुभं भूयात्॥

राम

प्रस्तोचरत